न सीदेत् प्रतिगृह्णन् स त्वयि पृथ्वीं ससागराम् ।
द्वे सन्ध्ये ह्युपतिष्ठेत गायत्रीं प्रयतः शुचिः ॥
यस्तस्य दुष्कृतं नास्ति पूर्व्वतः परतोऽपि वा ।
यज्ञदानरतो विद्वान् साङ्गवेदस्य पाठकः ॥
गायत्रीध्यानपूतस्य कलां नार्हन्ति षोड़शीम् ।
एवं किल्विषयुक्तस्तु विनिर्दहति पातकम् ॥
उभे सन्ध्ये ह्युपासीत तस्मान्नित्यं द्विजोत्तमः ॥
तस्य देहापवित्रत्वं यथा,—
"यथा देहापवित्रत्वं विप्रादीनां यतो भवेत् ।
देवर्षे ! शृणु तत्सर्व्वं नराणामानुपूर्व्विकम् ॥
जातके मृतकेऽस्नाते जलौकाभिः क्षते तथा ।
अपवित्रो द्विजातीनां देहः सन्ध्यादिकर्म्मसु ॥
अपूततनुरुत्सर्गे नरो मूत्रपुरीषयोः ।
अस्पृश्यस्पर्शने चैव ब्रह्मयज्ञजपादिषु ॥
रक्तपाते नखशृङ्गदन्तखड्गादिभिः क्षते ।
विप्रादेरशुचिः कायः शस्त्रास्त्रैः कण्टकादिभिः ॥
भुक्तहस्ताननोच्छिष्टेऽपवित्रः कृतमैथुने ।
शयने ब्राह्मणादीनां शरीरं क्षुरकर्म्मणि ॥
ज्वरार्दिभिश्चतुःषष्टिरोगैर्युक्ते द्विजन्मनाम् ।
वपुरप्रयतं पूजादानहोमजपादिषु ॥
धूमोद्गारे वमौ श्राद्धपतितान्नादिभोजनैः ।
तथा च रेतःस्खलने मर्त्यदेहापवित्रता ॥
अपवित्रं द्विजातीनां वपुः स्याद्राहुदर्शने ।
गर्हितदानग्रहणे पतिते पातकादिभिः ॥
अशौचान्तेन शुद्धिः स्याज्जातके मृतके द्विज ! ॥
सर्व्ववर्णाश्रमादीनां तनोः सन्ध्यादिकर्म्मसु ॥"
इति पाद्मोत्तरखण्डे १०६ अध्यायः ॥
अथ श्राद्धीयब्राह्मणनिर्णयः ।
मान्धातोवाच ।
"कीदृशेभ्यः प्रदातव्यं भवेच्छ्राद्धं महामुने ! ।
द्विजेभ्यः किंगुणिभ्यो वा तन्मे व्याख्यातुमर्हसि ॥
नारद उवाच ।
ब्राह्मणान्न परीक्षेरन्नान्यवर्णाश्रयो नृप ! ।
दैवे कर्म्मणि पित्रे च न्याय्यमाहुः परीक्षणम् ॥
देवताः पूजयन्तीह दैवेनैव हि तेजसा ।
उपेये तस्माद्भावेभ्यः सर्व्वेभ्यो दापयेन्नरः ॥
श्राद्धे त्वथ महाराज ! परीक्षेद्ब्राह्मणं बुधः ।
कुलशीलवयोरूपैर्विद्ययाभिजनेन च ॥
तेषामन्ये पङ्क्तिदूषास्तथान्ये पङ्क्तिपावनाः ।
अपाङ्क्तेयास्तु ये राजन् ! कीर्त्तयिष्यामि तान् शृणु ॥"
अपाङ्क्तेया यथा,—
कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः ।
ग्रामप्रेष्यो वार्द्धुषिको गायनः सर्व्वविक्रयी ॥
अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
सामुद्रिको राजदूतस्तैलिकः कूटकारकः ॥
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे ।
अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति ॥
पर्व्वकारश्च सूची च मित्रध्रुक् पारदारिकः ।
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च ॥
श्वभिश्च यः परिक्रामेद्यः शुना दष्ट एव च ।
परिवित्तिस्तु यश्च स्याद्दुश्चर्म्मा गुरुतल्पगः ॥
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ।
ईदृशा ब्राह्मणा ये च अपाङ्क्तेयास्तु ते मताः ॥
रक्षांसि गच्छते हव्यं यदेषान्तु प्रदीयते ।
श्राद्धे भुक्त्वा महाराज ! दुश्चर्म्मा गुरुतल्पगः ॥
श्राद्धं नाशयते तस्य पितरोऽपि न भुञ्जते ।
सोमविक्रयिणे दत्तं विष्ठातुल्यं भवेन्नृप ! ॥
भिषजे शोणितसमं नष्टं देवलके तथा ।
अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम् ॥
वहुवाणिजके दत्तं नेह नामुत्र तद्भवेत् ।
भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे ॥
ये तु धर्म्मव्यपेतेषु चरित्रापगतेषु च ।
हव्यं कव्यं प्रयच्छन्ति तेषां तत्प्राय नश्यति ॥
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः ।
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम् ॥
एतान् विद्धि महावाहो ! अपाङ्क्तेयान् द्विजाधमान् ।
शूद्राणामुपदेशन्तु ये कुर्व्वन्त्यल्पबुद्धयः ॥
षष्टिं काणः शतं षण्ढः श्वित्री यावत् प्रपश्यति ।
पङ्क्त्यां समुपविष्टायां तावद्दूषयते नृप ! ॥
यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः ।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम् ॥
असूयते च यद्दत्तं यच्च श्रद्धाविवर्जितम् ।
सर्व्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत् ॥
श्वानश्च पङ्क्तिदूषाश्च नावेक्षेरन् कथञ्चन ।
तस्मात् परिवृते दद्यात्तिलांश्चान्ने विकीरयेत् ॥
तिलैर्विरहितं श्राद्धं कृतं क्रोधवशेन च ।
यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः ॥
अपाङ्क्तेयो यतः पङ्क्त्यां भुञ्जानो नतु पश्यति ।
तावत् फलाद्भ्रंशयति दातारं तस्य वालिशम् ॥"
पङ्क्तिपावना यथा,—
"इमे हि मनुजश्रेष्ठ ! विज्ञेयाः पङ्क्तिपावनाः ।
विद्यावेदव्रतस्नाताः ब्राह्मणाः सर्व्व एव हि ॥
सदाचारपराश्चैव विज्ञेयाः पङ्क्तिपावनाः ।
मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः ॥
ऋतुकालाभिगामी च धर्म्मपत्नीषु यः सदा ।
वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत ॥
अथर्व्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः ।
सत्यवादी धर्म्मशीलः स्वकर्म्मनिरतश्च यः ॥
ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः ।
मखेषु च समन्त्रेषु भवन्त्यवभृतप्लुताः ॥
अक्रोधना ह्यचपलाः क्षान्ता दान्ता जितेन्द्रियाः ।
सर्व्वभूतहिता ये च श्राद्धेष्वेतान्निमन्त्रयेत् ॥
एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः ।
यतयो मोक्षधर्म्मज्ञा योगाः सुचरितव्रताः ॥
ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान् ।
ये च भाष्यविदः केचिद् ये च व्याकरणे रताः ॥
अधीयते पुराणं ये धर्म्मशास्त्राणि चाप्युत ।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः ॥
उपपन्नो गुरुकुले सत्यवादी सहस्रदः ।
अग्र्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥
यावदेते प्रपश्यन्ति पङ्क्त्यां तावत् पुनन्ति च ।
ततो हि पावनात् पङ्क्त्या उच्यन्ते पङ्क्तिपावनाः ॥
अनृत्विगनुपाध्यायः स चेदग्रासनं व्रजेत् ।
ऋत्विग्भिरननुज्ञातः पङ्क्त्या हरति दुष्कृतम् ॥
अथ चेद्वेदवित् सर्व्वैः पङ्क्तिदोषैर्विवर्जितः ।
न च स्यात् पतितो राजन् ! पङ्क्तिपावन उच्यते ॥
तस्मात् सर्व्वप्रयत्नेन परीक्ष्यामन्त्रयेद्द्विजान् ।
स्वकर्म्मनिरतान् शान्तान् कुले जातान् बहुश्रुतान् ॥
यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च ।
न प्रीणाति पितॄन् देवान् स्वर्गञ्च न स गच्छति
ब्राह्मणो ह्यनधीयानस्तृणाग्निरिव शाम्यति ।
तस्मिन् श्राद्धं न दातव्यं न हि भस्मनि हूयते ॥
ऋषीणां समये नित्यं ये चरन्ति महीपते ! ।
निश्चिताः सर्व्वधर्म्मज्ञास्तान् देवा ब्राह्मणान् विदुः ॥
स्वाध्यायनिष्ठानिरता ज्ञाननिष्ठास्तथैव च ।
तपोनिष्ठाश्च बोद्धव्याः कर्म्मनिष्ठाश्च पार्थिव ! ।
कव्यानि ज्ञाननिष्ठेभ्यः प्रतिष्ठाप्यानि भूमिप ! ।
तत्र ये ब्राह्मणान् केचिन्न निन्दन्ति हि ते वराः ॥
ये तु निन्दन्ति जल्पेषु न तान् श्राद्धेषु योजयेत् ।
ब्राह्मणा निन्दिता राजन् ! हन्युस्ते पुरुषं सदा ॥
वैखानसानां वचनमृषीणां श्रूयते नृप ! ।
दूरादेव निरीक्षेत ब्राह्मणान् वेदपारगान् ॥
प्रियो वा यदि वा द्वेष्यस्तेषां न श्राद्धमावपेत् ॥"
इति पाद्मे स्वर्गखण्डे श्राद्धपात्रनिर्णयो नाम ३५ अध्यायः ॥ आततायिब्राह्मणवधे दोषाभावो यथा,—
"आत्मानं हन्तुमायान्तमपि वेदान्तपारगम् ।
न दोषो हनने तस्य न तेन ब्रह्महा भवेत् ॥
प्रायश्चित्तं हिंसकानां न वेदेषु निरूपितम् ।
वधे समुचिते तेषामित्याह कमलोद्भवः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २५ अध्यायः ॥
(स्त्री, मन्त्रेतरवेदभागः । आशङ्कोपन्यास तन्निरसनपूर्व्वकं तल्लक्षणमाह ऋग्वेदभाष्योपद्घातप्रकरणे यथा । "तत्र ब्राह्मणस्य लक्षणं नास्ति । कुतः ? वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितुमशक्यत्वात् । पूर्व्वोक्तमन्त्रभाग एकः । भागान्तराणि च कानिचित् पूर्व्वैरुदाहृत्य संगृहीतानि ।
"हेतुर्निर्व्वचनं निन्दा प्रशंसा संशयो विधिः ।
परक्रिया पुराकल्पो व्यवधारणकल्पना ॥" इति ।
तेन ह्यन्नं क्रियते इति हेतुः १ । तद्दध्नो दधित्वमिति निर्व्वचनम् २ । अमेध्या वै माषाः इति निन्दा ३ वायुर्वै क्षेपिष्ठादेवतेति प्रशंसा ४ । तद्व्यचिकित्स जुहवानी मा हौषामिति संशयः ५ । यजमानेन सम्मितौदुम्बरी भवतीति विधिः ६ । माषानेव मह्यं पचन्तीति परकृतिः ७ पुरा ब्राह्मणा अभैषुरिति पुराकल्पः ८ । यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपाला-